# हल प्रश्न-पत्र-2020
## संस्कृतम्
### कक्षा-X

**अवधि : होरात्रयम्** **पूर्णाङ्कः : 80**

**निर्देशा :**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

**Delhi SET** **Code No. 52/1**

## खण्ड-'क'

**'अपठितांश—अवबोधनम्' (अपठितांश-अवबोधन)—**

**(10 अङ्काः)**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। 10**

सुन्दरराजः (सुन्दरराजा) राजदेवस्य गृहे उद्योगी आसीत्। सः राजदेवे विशेषविश्वासं प्रदर्शयति स्म। राजदेवः सीतारामनामकम् अन्यं कमपि युवकम् उद्योगे नियोजितवान्। तम् उक्तवान च- "सीताराम! सुन्दरराजः दशवर्षाणि यावत् मम गृहे उद्योगित्वेन सहायकः आसीत्, तथापि सः मयि विश्वासं न स्थापितवान्। अत एव सः अत्र उद्योगं परित्यक्तवान्। उद्योगिनः स्वामिनि विश्वासं कुर्युः सदा" इति धारणा। एकदा सीतारामः सुन्दरराजं मिलित्वा अवदत् यत् "भवान् राजदेवगृहे दश वर्षाणि यावत् कार्य कृंतवान् खलु ? अतः तत्र कथं व्यवहरणीयम् इति विषये मां किञ्चित् सुस्पष्टं वदतु" इति। "राजदेवः सज्जनः। तद्विषये मया वक्तव्यं किमपि नास्ति। भवान् तत्र कमपि क्लेशं न अनुभविष्यति" इति उक्तवान् सुन्दरराजः। तच्छ्रुत्वा सीतारामः प्रसन्नतया तत्र विश्वस्तः सन् कार्य कर्तुं प्रारभत। उक्तञ्च "विश्वासः फलदायकः महत्सु" इति। **$1 \times 2 = 2$**

**(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)**

(i) सुन्दरराजः कस्य गृहे उद्योगी आसीत् ?

(ii) राजदेवः अन्यं कम् उद्योगे नियोजितवान् ?

(iii) सुन्दरराजः कति वर्षाणि पर्यन्तं राजदेवस्य गृहे उद्योगित्वेन सहायकः आसीत् ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)**

(i) सीतारामः सुन्दरराजं मिलित्वा किं कथितवान् ?

(ii) राजदेवः कीदृशः व्यक्तिः आसीत् ?

(iii) कः कस्योपरि विश्वासं न स्थापितवान् ?

**(स) अस्य अनुच्छदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।**

**(द) यथानिर्देशम् उत्तरत (केवलं प्रश्नत्रयम्)**

(i) 'आसीत्' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

(क) सीतारामः

(ख) सुन्दरराजः

(ग) राजदेवः

(ii) राजदेवः सज्जनः अनयोः पदयोः विशेषणं किम्?

(क) दुर्जनः

(ख) परिजनः

(ग) सज्जनः

(iii) 'कष्टम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) क्लेशम्

(ख) करुणम्

(ग) असहयम्

(iv) अनुच्छेदे 'दुर्जनः' पदस्य कः विपर्यय आगतः ?

(क) परिजनः

(ख) सज्जनः

(ग) विश्वासः **$1 \times 3 = 3$**

**उत्तर—(अ) एकपदेन उत्तरम्— 1 × 2 = 2**

(i) राजदेवस्य

(ii) सीतारामम्

(iii) दशवर्षाणि

**(ब) पूर्णवाक्येन उत्तरम्— 2 × 2 = 4**

(i) सीतारामः सुन्दरराजं मिलित्वा कथितवान् यत् 'भवान् राजदेवगृहे दशवर्षाणि यावत् कार्यं कृतवान् खलु ? तस्य कीदृशं व्यवहारम् ?

(ii) राजदेवः सज्जनः आसीत्।

(iii) सुन्दराजः राजदेवस्योपरि विश्वासं न स्थापितवान्।

**(स) उपयुक्तं शीर्षकम् 01**

विश्वासः

**(द) निर्देशानुसारम्/भाषिक कार्यम् 1 × 3 = 3**

(i) (ख) सुन्दरराजः

(ii) (ग) सज्जनः

(iii) (क) क्लेशम्

(iv) (ख) सज्जनः

## खण्ड–'ख'

**रचनात्मककार्यम् (रचनात्मक कार्य) — (15 अङ्काः)**

**2. मातरं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत। ½ × 10 = 5**

(i) ............

शिमलातः

दिनाङ्कः

परमपूज्यमातः।

सादरं प्रणामाः।

अहं कुशलः अत्र तत्रापि कामये। भवत्याः पत्रं प्राप्य मनसि सन्तोषः (ii) ..........। मम भ्राता (iii) .......... स्वस्थः इति हर्षस्य विषयः। सः मम अध्ययनस्य (iv) .......... च विषये चिन्तितः आसीत्। अहं पञ्चवादने (v) .......... यथानिर्दिष्टं (vi) .......... करोमि (vii) .......... च पठामि। नववादने विद्यालयं (viii) ..........। चतुर्वादने (ix) ........ आगच्छामि। सप्तवादने गृहकार्यं करोमि। पितृमहाभागानां प्रणामाः कथनीयाः।

भवत्याः आज्ञापालकः (x) ..........।

प्रदीपः

**मञ्जूषा**

| |
|---|
| पुत्र, विद्यालयात्, यायाम, स्वास्थ्यस्य, जातः, कावेरीछात्रावासः, इदानीम्, तदनन्तर, उत्थाय, गच्छामि |

**उत्तर—पत्रलेखनम्— ½ × 10 = 5**

**कावेरीछात्रावासः**

शिमलातः

दिनाङ्क :............

परमपूज्य मातः।

सादर प्रणामाः

अहं कुशलः अत्र तत्रापि कामये। भवत्याः पत्रं प्राप्य मनसि सन्तोषः **जातः** (ii) मम भ्राता **इदानीम्** (iii) स्वस्थः इति हर्षस्य विषयः। सः मम अध्ययनस्य **(iv) स्वास्थ्यस्य,** च विषये चिन्तितः आसीत्। अहं पञ्चवादने **(v) उत्थाय,** यथानिर्दिष्टं, **(vi)** व्यायामं, करोमि, **(vii) तदनन्तर** च पठामि। नववादने विद्यालयं **(viii) गच्छामि**। चतुर्वादने **(ix) विद्यालयात्,** आगच्छामि। सप्तवादने गृहकार्यं करोमि। पितृमहाभागानां प्रणामाः कथनीयाः।

भवत्याः आज्ञापालकः (x) **पुत्रः**

प्रदीपः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत। 1 × 5 = 5**



**मञ्जूषा**

| |
|---|
| द्वे, बालिके, बहवः, नीत्वा, लोकाः, इतस्ततः, मेलकं, श्वेतवस्त्रम्, श्यामवस्त्रम्, गोलचक्रिका, उपविशन्ति, अनुभवन्ति, आनन्दम्, बहिः, दृश्यम् |

**अथवा**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।

**देशभक्तिः**

**मञ्जूषा**

| |
|---|
| स्वमातृभूमिः, भावना, सैनिकाः, रक्षकाः, स्वतन्त्रतायाः, राष्ट्रम्, रक्षाम् कुर्वन्ति, भारतीयाः, विचाराः, वीराः, माता, भूमिः, मानवम्, आत्मबलिदानम् |

**उत्तर— चित्रवर्णनम्:** **1 × 5 = 5**

1. इदं चित्रम् एकस्य मेलापकस्य अस्ति।
2. अत्र बहवः लोकाः इतस्ततः गच्छन्ति।
3. द्वे बालिके स्व मातृभ्यां सह दृश्येते।
4. बहवः जनाः गोलचक्रिकायाम् उपविशन्ति आनदं च अनुभवन्ति।
5. बालकाः बालिकाश्च श्वेतवस्त्रं श्यामवस्त्रं च धारयन्ति।

**अथवा**

**अनुच्छेदलेखनम्—** **1 × 5 = 5**

1. अस्माकं देशः भारतदेशः।
2. देशभक्ताः सैनिकाः स्व राष्ट्रस्य रक्षां कुर्वन्ति।
3. वयं भारतीयाः स्वमातृभूमिं पूजयामः।
4. देशभक्ताः रक्षकाः राष्ट्रस्य कृते आत्मबलिदानं कुर्वन्ति।
5. भारतीयाः वीराः स्वभूमिं माता इव पूजयन्ति।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं वाक्यपञ्चकम्)** **1 × 5 = 5**

(1) गोपाल गीत गाता है।
Gopal sings a song.

(2) हम सब सिनेमा देखते हैं।
We see picture.

(3) रमा कल कोलकाता जायेगी।
Rama will go to Kolkata tomorrow.

(4) कल श्याम कहाँ था ?
Where was Shyam yesterday ?

(5) तुम सब कलम से लिखो।
All of you write by pen.

(6) बच्चा भालू से डरता है।
The child fears from bear.

(7) क्या वे सब पढ़ें?
May they study ?

**उत्तर—अनुवादः** **1 × 5 = 5**

1. गोपालः गीतं गायति।
2. वयं चलचित्रं पश्यामः।
3. रमा श्वः कोलकातानगरं गमिष्यति।
4. ह्यः श्यामः कुत्रासीत् ?
5. यूयं कलमेन लिखत।
6. शिशुः भल्लूकात् विभेति।
7. किं ते पठन्तु ?

## खण्ड–'ग'

**'अनुप्रयुक्त व्याकरणम्' (अनुप्रयक्त व्याकरण)**

**(25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा लिखत। (केवल प्रश्नचतुष्टयम्)** **1 × 4 = 4**

(i) शत्रोः अपि शिरः + च्छेदः न करणीयः।
(ii) भासमानं निजभवनम् अपश्यत्।
(iii) आकाशः मेघैः आच्छन्नः आसीत्।
(iv) हे कल्याणि! सर्वदा सत्+मार्गम् अनुसरतु।
(v) अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः।

**उत्तर—सन्धिं/सन्धिविच्छेदम्** **1 × 4 = 4**

(i) शिरश्छेदः
(ii) भासमानम् + निजभवनम्
(iii) आत + छन्नः
(iv) सन्मार्गम्
(v) योजकः + तत्र

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहे वा प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)**

**1 × 4 = 4**

(i) सः स्थितप्रज्ञः इति को न जानति।
(क) स्थिता प्रज्ञा यस्य सः
(ख) स्थितं प्रज्ञं यस्य सः
(ग) स्थितः प्रज्ञः यस्या सा

(ii) मुनिः राजानं यथेष्टम् अभ्यनन्दत्।
(क) इष्टेन अनतिक्रम्य
(ख) इष्टाय अनतिक्रम्य
(ग) इष्टम् अनतिक्रम्य

(iii) कुशलवौ रामम् प्रणमतः।
(क) कुशः च लवः च

(ख) कुशम् लवः च

(ग) कुशः लवौ च

(iv) स भारस्य वेदनया क्रन्दति स्म।

(क) भारवेदनाः

(ख) वेदनाभारेण

(ग) भारवेदनया

(v) समः मृगस्य पश्चात् धावति स्म।

(क) अनुमृगम्

(ख) मृगपश्चात्

(ग) अनुमृगः

**उत्तर—समासः/विग्रहः** **1 × 4 = 4**

(i) (क) स्थिता प्रज्ञा यस्य सः

(ii) (ग) इष्टम् अनतिक्रम्य

(iii) (क) कुशः च लवः च

(iv) (ग) भारवेदनया।

(v) (क) अनुमृगम्।

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1 × 4 = 4**

(i) नृत्यातिरिक्तं का तव विशेषता।

(क) विशेष+तमप्

(ख) विशेष+तल्

(ग) विशेष+क्त

(ii) सर्वेषु जननी वत्सला।

(क) वत्सल+टाप्

(ख) वत्सल+अ

(ग) वत्सला+तल्

(iii) स्थिर+त्व लाघवम् मृजा।

(क) स्थिरात्वम्

(ख) स्थिरता

(ग) स्थिरत्वम्

(iv) बुद्धिः बलवती।

(क) बलवत्+ङीप

(ख) बलवत्+टाप्

(ग) बलवत्+मतुप्

(v) रामानन्दः एकः श्रेष्ठः धर्म + ठक् अस्ति।

(क) धर्मठिकः

(ख) धार्मिकः

(ग) धर्मिकः

**उत्तर—प्रकृतिः प्रत्ययः—** **1 × 4 = 4**

(i) (ख) विशेष + तल्

(ii) (क) वत्सल + टाप्

(iii) (ग) स्थिरत्वम्

(iv) (ग) बलवत् + मतुप्

(v) (ख) धार्मिकः।

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखतं संवादं पुनः लिखत—** **1 × 3 = 3**

गणेशः—सुरेशः। किं त्वं रामायणं पठसि ?

सुरेशः—आम् (i) .......... रामायणं पठ्यते।

गणेशः—किं त्वं श्लोकान् स्मरसि ?

सुरेशः—आम् मया (i) ........ अपि स्मर्यन्ते।

गणेशः—किं कक्षायाम् आचार्यः कथाम् पाठयति ?

सुरेशः—आम् कक्षायाम् आचार्येण कथा (iii) ...........।

**मञ्जूषा**

| पाठ्यते, मया, श्लोकाः |
|---|

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत। (केवल त्रयाणाम्)** **1 × 3 = 3**

(क) त्वं पुस्तकं पठसि।

(ख) शिशुना पयः पीयते।

(ग) अहं विद्यालयं गच्छामि।

(घ) गीतया गीतं गीयते।

(ङ) रमा संकल्पं करोति।

**उत्तर— वाच्यपरिवर्तनम् (संवादे)** **1 × 3 = 3**

आम् (i) **मया** रामायणं पठ्यते।

आम् मया (ii) **श्लोकाः** अपि स्मर्यन्ते।

आम् कक्षायाम् आचार्येण कथा (iii) पाठ्यते।

**अथवा**

**वाक्यानां वाच्यपरिवर्तनम्** **1 × 3 = 3**

(क) त्वया पुस्तकं पठ्यते।

(ख) शिशुः पयः पिबति।

(ग) मया विद्यालयं गम्यते।

(घ) गीता गीतं गायति।

(ङ) रमया संकल्पं क्रियते।

**9. अधोलिखितदिनचर्यायाः रिक्तस्थानानि कालबोधकशब्दैः पूरयत। (केवलं प्रश्नचतुष्टयम्)** **1 × 4 = 4**

(क) दिव्यांशः प्रातः 8:00 .......... योगं करोति।

(ख) रमेशः सायं 4:30 .......... भ्रमणाय गच्छति।

(ग) रमाः प्रातः 7:15 .......... प्रातरांशं करोति।

(घ) चन्द्रशेखरः सायं 6:30 .......... व्यायामं करोति।

(ङ) कमलेशः रात्रौ 8:45 .......... पुस्तकं पठति।

**उत्तर—समयः** **1 × 4 = 4**

(क) अष्टवादने

(ख) सार्धचतुर्वादने

(ग) सपादसप्तवादने

(घ) सार्धषड्वादने

(ङ) पादोननववादने

**10. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः अव्ययपदैः पूरयत। (केवलं प्रश्नषट्कम्)** **½×6 = 3**

(क) विद्यालये..................... अवकाशः भविष्यति।

(ख) ..................... रविवासरः अस्ति।

(ग) पत्रवाहकः ..................... पत्राणि दातुं गच्छति।

(घ) यदि मेघः गर्जति ..................... मयूराः नृत्यन्ति।

(ङ) अहम् ..................... आंग्लभाषां पठामि।

(च) सा गणितं ..................... पठितुम् इच्छति

(छ)..................... निरीक्षकेन निर्णयः न करणीयः।

(ज) त्वम् अत्र ..................... श्रमं करोषि।

**मञ्जूषा**

| |
|---|
| कदा, सहसा, वृथा, अपि, तर्हि, श्वः, अद्य, इदानीम् |

**उत्तर—अव्ययपदम्** **½ × 6 = 3**

(क) श्वः

(ख) अद्य

(ग) इदानीम्

(घ) तर्हि

(ङ) अपि

(च) कदा

(छ) सहसा

(ज) वृथा

**11. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)**

**1 × 3 = 3**

(क) वृक्षात् फलाः पतन्ति। (फले/फलानि/फलः)

(ख) सुमेधा कन्दुकेन क्रीडिष्यथ। (क्रीडिष्यसि/क्रीडिष्यथः/क्रीडिष्यति)

(ग) बालकाः पुस्तकम् अपठत् (त्वम/सः/अहम्)

(घ) इमौ बालकौ भ्रमन्ति। (भ्रमतः/भ्रमसि/भ्रमति)

**उत्तर—अशुद्धपदानाम् उत्तरम्— (उत्तराणि)** **1 × 3 = 3**

(क) फलानि

(ख) क्रीडिष्यति

(ग) सः

(घ) भ्रमतः

## खण्ड–'घ'

**पठित—अवबोधनम् (पठित अवबोधन)— (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

अग्रिमे दिने सः आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्। अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः कोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति। न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

**(अ) एकपदेन उत्तरत (केवल प्रश्नद्वयम्)** **½×2 = 1**

(क) न्यायाधीशः कः आसीत् ?

(ख) कस्य अभावात् न्यायाधीशः निर्णेतुं नाशक्नोत् ?

(ग) न्यायालये कः समागत्य न्यवेदयत् ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)** **1 × 1 = 1**

(क) न्यायाधीशः कौ शवं न्यायालये आनेतुमदिष्टवान्?

(ख) तत्रत्यः कर्मचारी समागत्य किं न्यवेदयत् ?

**(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

(i) 'निरपराधम्' इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) दोषभाजनम्

(ख) निर्दोषम्

(ग) सदोषम्

(ii) 'श्रुतवान्' इति पदस्य कर्तृपदं किम् ?

(क) व्योमेशचन्द्रः

(ख) रमेशचन्द्रः

(ग) बंकिमचन्द्रः

(iii) 'दिने' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?

(क) अग्रिमे

(ख) अन्येद्युः

(ग) ततः

(iv) 'न्यायाधीशः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम् ?

(क) न्यवेदयत्

(ख) आदिष्टवान्

(ग) स्थापितवान्

**उत्तर—गद्यांशस्य उत्तराणि—** **½ × 2 = 1**

**(अ) एकपदेन**

(क) बंकिमचन्द्रः

(ख) प्रमाणाभावात्

(ग) कर्मचारी

**(ब) पूर्णवाक्येन** **1 × 1 = 1**

(क) न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये अनेतुमादिष्टवान्।

(ख) कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयम् इति।

**(स) निर्देशानुसारम्/भाषिककार्यम्** **1 × 3 = 3**

(i) (ख) निर्दोषम्

(ii) (ग) बंकिमचन्द्रः

(iii) (क) अग्रिमे

(iv) (ख) आदिष्टवान्

**13. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**½ × 2 = 1**

**(अ) एकपदेन उत्तरत्। (केवलं प्रश्नद्वयम्)**

(i) प्रथमः धर्मः कः ?

(ii) अस्माकं आचारः सम्यक् भवेत् इति केषां वचनम् अस्ति ?

(iii) प्राणेभ्योऽपि विशेषतः कः रक्षणीयः ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)** **1 × 1 = 1**

(क) जनः विशेषतः प्राणेभ्यः अपि के रक्षेत् ?

(ख) विदुषां वचः किम् ?

**(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

(i) 'रक्षेत्' इति क्रियापदस्य कर्तृपदं किं भवेत् ?

(क) जनः

(ख) सदाचारम्

(ग) आचारः

(ii) 'प्रथमःधर्मः' अनयोः पदयोः किं विशेष्यपदम् ?

(क) धर्मः

(ख) वचः

(ग) विशेषतः

(iii) 'कथनम्' इत्यस्य पदस्य कः पर्यायः श्लोके प्रयुक्तः ?

(क) धर्मः

(ख) वचः

(ग) सदा

(iv) 'मूर्खाणाम्' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(क) वचः

(ख) इति

(ग) विदुषाम्

**उत्तर—पद्यांशस्य उत्तराणि—**

**(अ) एकपदेन** **½ × 2 = 1**

(i) आचार:

(ii) विदुषाम्

(iii) सदाचार:

**(ब) पूर्णवाक्येन** **1 × 1 = 1**

(क) जन: विशेषत: प्राणेभ्य: अपि सदाचारं रक्षेत्।

(ख) आचार: प्रथम: धर्म: इति विदुषां वच:।

**(स) निर्देशानुसारम्/भाषिक कार्यम्** **1 × 3 = 3**

(i) (ख) सदाचारम्

(ii) (क) धर्म:

(iii) (ख) वच:

(iv) (ग) विदुषाम्

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **5**

चाणक्य: — भो श्रेष्ठिन्! प्रीताभ्य: प्रकृतिभ्य: प्रतिप्रियमिच्छन्ति राजान:।

चन्दनदास: — आज्ञापयतु आर्य:, किं कियत् च अस्मज्जनादिष्यते इति।

चाणक्य: — भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्ध: प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदास: — आज्ञापयतु आर्य:।

चाणक्य: — राजनि अविरुद्धवृत्तिर्भव।

चन्दनदास: — आर्य क: पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते ?

**(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **½×2=1**

(क) चाणक्य: चन्दनदासं किं कथयित्वा सम्बोधयति?

(ख) कस्य एव अर्थसम्बन्ध: प्रीतिम् उत्पादयति ?

(ग) भवताम् अपरिक्लेश: एव कस्य प्रीतिं जनयति ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)** **1 × 1 × 1**

(क) प्रीताभ्य: प्रकृतिभ्य: राजान: किम् इच्छन्ति ?

(ख) 'राजनि अविरुद्धवृत्तिर्भव' इति श्रुत्वा चन्दनदास: किं कथयति ?

**(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

(i) नाट्यांशे 'आविर्भवति' इति क्रियाया: कर्तृपदं किम् ?

(क) अर्थसम्बन्ध:

(ख) अपरिक्लेश:

(ग) अविरुद्धवृत्ति:

(ii) 'चन्द्रगुप्तराज्यम् इदम्' अत्यत्र विशेष्यपदं किम् ?

(क) चन्द्रगुप्तराज्यम्

(ख) राज्यम्

(ग) इदम्

(iii) नाट्यांशे 'विरुद्धवृत्ति:' इत्यस्य किं विलोमपदं प्रयुक्तम् ?

(क) अपरिक्लेश:

(ख) अविरुद्धवृत्ति:

(ग) अर्थसम्बन्ध:

(iv) 'अर्थसम्बन्ध:' इति कर्तृपदस्य क्रियापदं गद्यांशात् चित्वा लिखत।

(क) उत्पादयति

(ख) प्रसारयति

(ग) कुयास्ति नाट्यांशे?

**उत्तर— नाट्यांश:**

**(अ) एकपदेन** **½ × 2 = 1**

(क) भो श्रोष्ठिन्!

(ख) नन्दस्यैव

(ग) चन्द्रगुप्तस्य

**(ब) पूर्णवाक्येन** **1 × 1 = 1**

(क) प्रीताभ्य: प्रकृतिभ्य: राजान: प्रियम् इच्छन्ति।

(ख) चन्दनदास: कथयति-आर्य! क: पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते।

**(स) निर्देशानुसारम्/भाषिककार्यम्** **1 × 3 = 3**

(i) (ख) अपरिक्लेश:

(ii) (क) चन्द्रगुप्तराज्यम्

(iii) (ख) अविरुद्धवृत्ति:

(iv) (क) उत्पादयति।

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** **1 × 4 = 4**

(क) पुरा त्वया मह्यं व्याघ्रत्रयं दत्तम्।

(ख) सिंह: वानराभ्यां स्वरक्षायाम् असमर्थे एवासीत्।

(ग) आरोग्यम् चापि व्यायामाद् उपजायते।

(घ) धैर्यवान् लोके परिभवं न प्राप्नोति।

(ङ) शिविना विना इदं दुष्करं कार्यं क: कुर्यात्!

**उत्तर—प्रश्ननिमणिम्** **1 × 4 = 4**

(क) पुरा त्वया **कस्मै** व्याघ्रत्रयं दत्तम् ?

(ख) सिंह: वानराभ्यां **काभ्याम्** असमर्थ एवासीत् ?

(ग) आरोग्यम् चापि **कस्मात्** उपजायते ?

(घ) धैर्यवान् **कुत्र** परिभवं न प्राप्नोति ?

(ङ) **केन** बिना इदं दुष्करं कार्यं क: कुर्यात् ?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकयो: अन्वयं पूरयत।**

I. पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥

**½ × 4 = 2**

अन्वय:-पिता पुत्राय (i) ................ महत् विद्याधनं (ii) ................। अस्य (पुत्रस्य) पिता किं (iii) ............... तेपे इति उक्ति: (iv) ................।

II. त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी:॥

**½ × 4 = 2**

अन्वय:- य: धर्मप्रदां (i) ................ त्यक्त्वा (ii) ........... य: अभ्युदीरयेत्, (स:) विमूढधी: (iii) ............... फलं परित्यज्य अपक्वम् (फलं) (iv) ................।

**मञ्जूषा**

| |
|---|
| भुङ्क्ते, तत्कृतज्ञता, यच्छति, पक्वम्, वाचम्, बाल्ये, तप: परुषाम् |

**अथवा**

**मञ्जूषा साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानि पूरयित्वा पुन: लिखत।** **1 × 4 = 4**

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु:।
नास्त्युद्यमसमो बन्धु: कृत्वा यं नावसीदति॥

भावार्थ:—इदं सत्यमेव यत् (i) ................ तु मानवानां शरीरेषु स्थित: (ii) ................ शत्रु: अस्ति। यत: शरीरे आलस्यकारणात् मानवस्य विकासगति: स्थिरा भवति। मानवानां कृते जगति (iii) ................ कोऽपि बन्धु: नास्ति। मानव: उद्यमं कृत्वा एव निरन्तरं विकासं करोति, अनेन कदापि (iv) ................ न भवति।

**मञ्जूषा**

| |
|---|
| दु:खित:, उद्यमसम:, आलस्यम्, महान् |

**उत्तर—अन्वय:** **½ × 4 = 2**

(I) पिता पुत्राय—

**(i) बाल्ये** महत् विद्याधनम्

**(ii) यच्छति** अस्य (पुत्रस्य) पिता किम्

**(iii) तप:** तेपे इति उक्ति:।

**(iv) तत्कृतज्ञता।**

(II) य: धर्मप्रदाम्—

**(i) वाचम्** त्यक्त्वा

**(ii) परुषाम्** य: अभ्युदीरयेत्, (स:) विमूढधी:

**(iii) पक्वं** फलं परित्यज्य अपक्वम् (फलं)

**(iv) भुङ्क्ते।**

**अथवा**

**भावार्थ**—इदं सत्यमेव यत् (i) **आलस्यं** तु मानवानां शरीरेषु स्थित: **(ii) महान्** शत्रु: अस्ति। यत: शरीरे आलस्य कारणात् मानवस्य विकासगति: स्थिरा भवति। मानवानां कृते जगति **(iii)** उद्यमसम: कोऽपि बन्धु: नास्ति। मानव: उद्यमं कृत्वा एव निरन्तरं विकासं करोति, अनेन कदापि **(iv) दु:खित:** न भवति।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत।** **½ × 8 = 4**

(i) यतो हि अयम् अन्येभ्य: दुर्बल:।

(ii) 'बहूनि अपत्यानि मे सन्ति' इति सत्यम्।

(iii) तथापि मम अस्मिन् पुत्रे विशिष्ट: स्नेह:।

(iv) अचिरादेव चण्डवातेन मेघरवै: च सह प्रवर्ष: समजायत।

(vi) स तामेव असान्त्वयत् 'गच्छ वत्से ! सर्वं भद्रं जायेत'।

(v) सुरभिवचनं श्रुत्वा इन्द्रस्य हृदयम् अद्रवति।

(vii) तथापि दुर्बले सुते मातुः अधिका कृपा भवति।

(viii) सर्वेषु सन्तानेषु जननी तुल्यवत्सला एव।

**उत्तर—घटनाक्रम** **½ × 8 = 04**

(i) 'बहूनि अपत्यानि मे सन्ति' इति सत्यम्।

(ii) तथापि मम अस्मिन् पुत्रे विशिष्टः स्नेहः।

(iii) यतोहि अयम् अन्येभ्यः दुर्बलः।

(iv) सर्वेषु सन्तानेषु जननी तुल्यवत्सला एव।

(v) तथापि दुर्बले सुते मातुः अधिका कृपा भवति।

(vi) सुरभिवचनं श्रुत्वा इन्द्रस्य हृदयम् अद्रवत्।

(vii) स तामेव असान्त्वयत् गच्छ वत्से! सर्वं भद्रं जायेत।

(viii) अचिरादेव चण्डवातेन मेघरवैः च सह प्रवर्षः समजायत।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति, तानि यथाक्रमेण समक्षं लिखत। (केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

| **क** | **ख** |
|---|---|
| सुहृद् | सूर्यः |
| गजः | शरीरम् |
| सविता | कुञ्जरः |
| गात्रम् | मित्रम् |

**अथवा**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गनुकूलम् उचितार्थन् चित्वा लिखत। (केवलं प्रश्नत्रयम्)**

**1 × 3 = 3**

1. त्वया दुष्टः हन्तव्यः इति।

(क) मारणीयः

(ख) पालनीयः

(ग) ध्येयः

2. आवयोः वंशस्य कर्त्ता 'सहस्रदीधितिः' एव।

(क) चन्द्रः

(ख) शिवः

(ग) भानुः

3. अनृतं वदसि चैत् काकः दशेत्।

(क) सत्यम्

(ख) मिथ्या

(ग) मन्दम्

4. दुर्बलः बलीवर्दः जवेन गन्तुम् अशक्तः।

(क) द्रुतगत्या

(ख) काठिन्येन

(ग) ताडनेन

**उत्तर—शब्दार्थ—मेलनम्** **1 × 3 = 3**

| **क** | | **ख** |
|---|---|---|
| सुहृद् | – | मित्रम् |
| गजः | – | कुञ्जरः |
| सविता | – | सूर्यः |
| गात्रम् | – | शरीरम् |

**अथवा**

**प्रसंगानुकूलम्** **1 × 3 = 3**

(i) (क) मारणीयः

(ii) (ग) भानुः

(iii) (ख) मिथ्या

(iv) (क) द्रुतगत्या

**Outside Delhi SET** **Code No. 52**

## खण्ड–'क'

**'अपठितांश—अवबोधनम्' (अपठितांश-अवबोधना) (10 अङ्काः)**

**1. अधोलिखितम् गद्यांश पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।** **10**

**निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।**

वर्तमानकाले मानवः समस्यागर्ते पतितोऽस्ति। एकत्र देहस्य अनेके रोगाः, अन्यत्र मनसः चिन्ताः। कार्यवैफल्येन नैराश्यम् भवति। जीवनशैल्याः परिवर्तनं विना मार्गान्तरं नास्ति। व्यायामाभावात् शरीरस्य स्थौल्यं वर्धते तारुण्यावस्थायां च मधुमेहः जायते। एतदेव व्याधिः उच्यते। आधिव्याधिभ्यां पीडितो मानवः निद्रां न लभते।

मानवः अतृप्त्या सदा खिद्यते । अतः यथाशक्ति शारीरिक श्रमः कर्त्तव्यः। यत्र पद्भ्यां गन्तुं शक्यते तत्र वाहनेन न गन्तव्यम्। अलं श्रमचिन्तया। इदं शरीरं पोषितमपि पालितमपि च शोभते। स्वस्थशरीरेणैव मानवः सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानां समाधाने कुशलः भवति। सः आध्यात्मिकज्ञानमपि लभते। उक्तञ्च 'शरीरमाद्यं खलु धर्मसाधनम्'।

**(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** $1 \times 2 = 2$

(i) कस्य अभावात् शरीरस्य स्थौल्यं वर्धते ?

(ii) मानवः कया सदा खिद्यते ?

(iii) वर्तमानेकाले कः समस्यागर्ते पतितोऽस्ति ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम)** $2 \times 2 = 4$

(i) कार्यवैफल्येन किं भवति ?

(ii) स्वस्थशरीरेणैव मानवः कासां समाधाने कुशलः भवति ?

(iii) मानवैः यथाशक्ति कः कर्त्तव्यः ?

**(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**(द) यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

**(i)** 'खिद्यते' इत्यस्याः क्रियायाः अनयोः पदयोः विशेषणं कर्तृपदं किम् ?

(क) सन्तोषः

(ख) मानवः

(ग) मधुमेहः

**(ii)** 'पीडितः मानवः' क्रियायाः अनयोः पदयोः विशेषणं कर्तृपदं किम् ?

(क) पीडितः

(ख) मानवः

(ग) नरः

**(ii)** 'देहस्य' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

(क) मानवस्य

(ख) दुःखस्य

(ग) शरीरस्य

**(iv)** अनुच्छेदे 'अन्तिमम्' पदस्य कः विपर्ययः आगतः ?

(क) अलम्

(ख) आद्यम्

(ग) इदम्

**उत्तर—अपठित गद्यांश :**

**(अ) एकपदेन** $1 \times 2 = 2$

(i) व्यायामाभावत्।

(ii) अतृप्त्या।

(iii) मानवः।

**(ब) पूर्णवाक्येन** $2 \times 2 = 4$

(i) कार्यवैफल्येन नैराश्यम् भवति।

(ii) स्वस्थशरीरेण मानवः सोत्साहं गृहस्थजीवनस्य सर्वविधानां समस्यानां समाधाने कुशलः भवति।

(iii) मानवैः यथाशक्ति शारीरिकश्रमः कर्तव्यः।

**(स) उपर्युक्तं शीर्षकम्** $1 \times 1 = 1$

व्यायामः/श्रमः शरीरम् आद्यं खलुधर्मसाधनम्।

**(द) निर्देशानुसारम्** $1 \times 3 = 3$

(i) (ख) मानवः।

(ii) (क) पीडितः।

(iii) (ग) शरीरस्य।

(iv) (ख) आद्यम्।

## खण्ड–'ख'

**रचनात्मककार्यम् (रचनात्मक-कार्य)— (15 अङ्काः)**

**2. पितरं प्रति लिखितम् अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत।** $\frac{1}{2} \times 10 = 5$

ताराचंद—छात्रावासः

**(i)** दिनाङ्कः ............

पूज्याः (ii) ............

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्नः

भविष्यति यत् गतदिवसे अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया (iii) ........... स्थानं लब्धम्। क्रीडादिवसे (iv) ..... ........ अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं (v) ............। अयं वार्षिकोत्सवः आगामि-सोमवासरे (vi) ............। विद्यालयस्य पक्षतः ह्य एवं (vii) ............ प्रेषितम्। अहमपि (viii) .... ......... सूचयामि, भवान् अवश्यम् आगच्छतु। मम (ix) ............ भविष्यति।

भवतः आज्ञाकारी पुत्रः

(x) ............।

**मञ्जूषा**

| |
|---|
| निमन्त्रणपत्रम्, धावनप्रतियोगितायाम्, पीयूषः, उत्साहवर्धनम्, भवन्तम्, प्रयागराजतः, प्रथमम्, करिष्यामि, पितृमहोदयाः, आयोजयिष्यते। |

**उत्तर—पत्रलेखनम्** **½× 10 = 5**

ताराचन्द-छात्रावासः

**प्रयागराजतः** (i)

दिनाङ्कः .............

पूज्याः **पितृमहोदयाः** (ii)

सादरं प्रणामाः।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवान् अतिप्रसन्नः भविष्यति यद् गतदिवसे अन्तर्विद्यालयीयभाषणप्रतिस्पर्धायां मया **प्रथमं** (iii) स्थानं लब्धम्। क्रीडादिवसे **धावनप्रतियोगितायाम्** (iv) अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे अहं नाट्याभिनयं **करिष्यामि** (v)। अयं वार्षिकोत्सवः आगामिसोमवासरे **आयोजयिष्यते** (vi)। विद्यालयस्य पक्षतः ह्य एव **निमंत्रणपत्रं** (vii) प्रेषितम्। अहमपि **भवन्तम्** (viii) सूचयामि, भवान् अवश्यम् आगच्छतु। मम **उत्साहवर्धनं** (ix) भविष्यति। भवतः आज्ञाकारीपुत्रः

**पीयूषः** (x)

**3. अधः प्रदत्तं चित्रं दृष्ट्वां मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत।** **1 × 5 = 5**



**मञ्जूषा**

| |
|---|
| पति, पत्नी, बालिका, वृक्षाः, बहवः, जनाः परस्परम्, वार्तालापम्, कुर्वन्ति, लिखति, पत्राणि, वृद्धजनाः, अपि, सन्ति, स्त्रियः, पुरुषाः। |

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**'पुस्तकमेलकम्'**

**मञ्जूषा**

| |
|---|
| चित्राणि, पुस्तकानि, मित्राणि, लोकार्पणम्, अभवत्, अतीवप्रसन्ना, ध्वनिमुद्रिकाः, संगणकम्, अन्तः प्रवेशः, विविधं साहित्यम्, विभिन्नानि, प्रकोष्ठानि, संस्कृत-पुस्तकानि, जनाः, पश्यन्ति। |

**1 × 5 = 5**

**उत्तर—चित्रवर्णनम्** **1 × 5 = 5**

(i) इदं चित्रम् एकस्य उद्यानस्य अस्ति।

(ii) अत्र बहवः जनाः परस्परं वार्लालापं कुर्वन्ति।

(iii) एका बालिका वृक्षं पश्यति।

(iv) वृक्षाणाम् अग्रः स्त्रियः पुरुषाः वृद्धजनाः च तिष्ठन्ति।

(v) एकः पुरुषः पत्रं लिखति।

**अथवा**

**अनुच्छेदलेखनं पुस्तकमेलकम्**

**1 × 5 = 5**

1. अस्मिन् वर्षे दिल्लीस्थः प्रगतिमैदाने पुस्तकमेलकम् आयोजितम् आसीत्।
2. तत्र द्वादश विभिन्नानि प्रकोष्ठानि आसन्।
3. एकस्मिन् प्रकोष्ठे एकस्य पुस्तकस्य लोकार्पणम् अभवत्।
4. विविध प्रकोष्ठान्तर्गते संस्कृत-पुस्तकानि अपि जनाः पश्यन्ति पठन्ति च।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषयाम् अनूद्य लिखत।**

**(केवलं वाक्यपञ्चकम्)** **1 × 5 = 5**

(1) लता नाचती है।

Lata dances.

(2) तुम सब गेंद से खेलते हो।

All of you play by ball.

(3) कल मोहन बाजार जायेगा।

Mohan will go to market tomorrow.

(4) कल रमेश कहाँ था ?

Where was Ramesh yesterday ?

(5) रमा सीता के साथ पढ़े।

Rama study with Sita.

(6) वृक्ष से पत्ते गिरते हैं।

Leaves fall down from tree.

(7) क्या मैं पढ़ूँ ?

May I read ?

**उत्तर—संस्कृत भाषायाम् अनुवादः** **1 × 5 = 5**

1. लता नृत्यति।
2. यूयं कन्दुकेन क्रीडथ।
3. श्वः मोहनः आपणं गमिष्यति।
4. ह्यः रमेशः कुत्रासीत् ?
5. रमा सीतया सह पठतु।
6. वृक्षात् पत्राणि पतन्ति।
7. किम् अहं पठानि ?

## खण्ड–'ग'

**'अनुप्रयुक्त व्याकरणम्' (अनुप्रयुक्त व्याकरणम्) (25 अङ्काः)**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धि सन्धिविच्छेदं वा कृत्वा लिखत—(केवलं प्रश्नचतुष्टयम्)**

**1 × 4 = 4**

**(i)** हयाः + च वहन्ति बोधिताः।

**(ii)** श्रेष्ठम् + कर्म एवं कर्त्तव्यम्।

**(iii)** अस्माभिः सत् + मार्गे चलितव्यम्।

**(iv)** सम्पूर्णभारते एकच्छत्रं राज्यम् अस्ति।

**(v)** एतयोः + जननी तेनावमानिता।

**उत्तर—सन्धि/सन्धिविच्छेदः** **1 × 4 = 4**

(i) हयाश्च

(ii) श्रेष्ठं कर्मम्

(iii) सन्मार्गे

(iv) एक + छत्रम्

(v) एतयोर्जननी

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**

**1 × 4 = 4**

**(i)** काचिदियम् व्याघ्रमारी।

(क) व्याघ्राय मारयति इति सा

(ख) व्याघ्रम् मारयति इति सा

(ग) व्याघ्रस्य मारयति इति सा

**(ii)** मुनिः राजानं इष्टम् अनतिक्रम्य अभ्यनन्दत्।

(क) यथिष्टम्

(ख) यथाष्टम् (ग) यथेष्टम्

**(iii)** रामः लवकुशौ उपवेशयितुं कथयति।

(क) लवम् च कुशम् च

(ख) लवाय च कुशाय च

(ग) लवः च कुशः च

**(iv)** गलबद्धशृगालकः व्याघ्रः पुनः पलायितः।

(क) गलबद्धः शृगालकः

(ख) गले बद्धः शृगालः यस्य सः

(ग) शृगालस्य गले बद्धः यः सः

**(v)** क्रोधो हि शत्रुः देहस्य विनाशनाय।

(क) देहविनाशनाय

(ख) देहनाशने

(ग) देहोनाशनाय

**उत्तर—समास/विग्रह :** **1 × 4 = 4**

(i) (ख) व्याघ्रं मारयति इति सा।

(ii) (ग) यथेष्टम्

(iii) (क) लवम् च कुशम् च।

(iv) (ख) गले बद्धः शृगालः यस्य सः।

(v) (क) देहविनाशाय।

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ**

**संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत –**

**(केवलं प्रश्न चतुष्टयम्)** **1 × 4 = 4**

**(i)** नास्ति मातृसमा <u>प्रिय + टाप्</u>।

(क) प्रियः

(ख) प्रियम्

(ग) प्रिया

**(ii)** यत् मम <u>सत्यप्रिय + तल्</u>।

(क) सत्यप्रियता

(ख) सत्यप्रियम्

(ग) सत्यापिता

**(iii)** व्याघ्रजाद् भयात् <u>बुद्धिमती</u> मुक्ता जाता।

(क) बुद्धि + ङीप्

(ख) बुद्धिमत् + टाप्

(ग) बुद्धिमत् + ङीप्

**(iv)** परश्वः वयम् <u>ऐतिहासिक</u>स्थलानि द्रष्टुं गमिष्यामः।

(क) इतिहास + घञ्

(ख) इतिहास + ठक्

(ग) इतिहास + तल्

**(v)** अयं सन्दर्भः प्रथमम् अवतीर्णः <u>वसुमतीम्</u>।

(क) वसु + मतुप्

(ख) वसु + तल्

(ग) वसु + तवत्

**उत्तर—प्रकृति-प्रत्ययः** **1 × 4 = 4**

(i) (ग) प्रिया

(ii) (क) सत्यप्रियता

(iii) (ग) बुद्धिमत् + ङीप्

(iv) (ख) इतिहास + ठक्

(v) (क) वसु + मतुप्

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत—** **1 × 3 = 3**

शीला—सुधे ! इदानीं भवती किं पठति ?

सुधा—इदानीं (i) .............. गीतापुस्तकं पठ्यते।

शीला—अहमपि प्रातः गीतां (ii) ..............।

सुधा—गीतायां कर्मयोगस्य निरूपणम् अस्ति। एतद्विषये (iii) .............. कथं चिन्त्यते ?

**मञ्जूषा**

| भवत्या, मया, पठामि |
|---|

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत।**

**(केवल त्रयाणाम्)** **1 × 3 = 3**

(क) रीना गीतं गायति।

(ख) श्यामः मोहनं पृच्छति।

(ग) भिक्षुकेण धनं याच्यते।

(घ) अहं जलं पिबामि।

(ङ) तेन मृगः हन्यते।

**उत्तर—वाच्यपरिवर्तनम्** **1 × 3 = 3**

(i) मया

(ii) पठामि

(iii) भवत्या

**अथवा**

(क) रीनया गीतं गीयते।

(ख) श्यामेन मोहनः पृच्छ्यते।

(ग) भिक्षुकः धनं याचते।

(घ) मया जलं पीयते।

(ङ) सः मृगं हन्ति।

**9. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दैः पूरयत। (केवलं प्रश्न चतुष्टयम्)**

**1 × 4 = 4**

(क) उमा प्रातः 8:30 .............. वादने गृहकार्यं करोति।

(ख) सुनीलः सायं 6:15 .............. वादने जागति।

(ग) अनिलः सायं 5:00 .............. वादने उद्याने क्रीडति।

(घ) सा प्रातः 7:30 .............. वादने पूजां करोति।

(ङ) कमला रात्रौ 9:45 .............. वादने स्वपिति।

**उत्तर—समयलेखनम्—** **1 × 4 = 4**

(क) सार्धाष्ट (वादने)

(ख) सपाद-षड् (वादने)

(ग) पञ्च (वादने)

(घ) सार्ध-सप्त (वादने)

(ङ) पादोन-दश (वादने)

**10. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषाप्रदत्तैः उचितैः अव्ययपदैः पूरयत। (केवल प्रश्नषट्कम)**

**½ × 6 = 3**

(क) आशीषः .............. अत्र आगमिष्यति।

(ख) उर्मिला सीता .............. गीतं गायतः।

(ग) परीक्षकः .............. परीक्षणं कृतवान्।

(घ) सोहनः त्वया .............. क्रीडितुम् इच्छति।

(ङ) निरीक्षकः .............. विद्यालयम् आगमिष्यति ?

(च) अहो! मम सखा .............. आगतः।

(छ) .............. सर्वत्र वायुः विद्यमानोऽस्ति।

(ज) .............. भवान् किं खादति ?

**मञ्जूषा**

| यत्र-तत्र, इदानीम्, च, श्वः, ह्यः, अपि, कुतः, सह |
|---|

**उत्तर—अव्ययः** **½ × 6 = 3**

(क) श्वः

(ख) च

(ग) ह्यः

(घ) सह

(ङ) कुतः

(च) अपि

(छ) यत्र-तत्र

(ज) इदानीम्

**11. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं प्रदत्त-विकल्पेभ्यः चित्वा लिखत—**

**(केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

(क) त्वं कदा जन्तुशालां द्रक्ष्यामः ? (पश्यथ/द्रक्ष्यसि/द्रक्ष्यन्ति)

(ख) सुदामा कृष्णस्य मित्रः आसीत्। (मित्रे/मित्रम्/मित्राणि)

(ग) कोकिला: गायति। (गायतः/गायति/गायन्ति)

(घ) भ्रमराः मधुपानम् अकरोत्।

(अकुरुताम्/अकुर्वन्/अकरोत्)

**उत्तर—शुद्धिलेखनम्** **1 × 3 = 3**

(क) द्रक्ष्यसि

(ख) मित्रम्

(ग) गायन्ति

(घ) अकुर्वन्

## खण्ड–'घ'

**पठित—अवबोधनम् (पठित अवबोधन)— (30 अङ्काः)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पद्यात्रा न शुभावहा, एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(अ) एकपदेन उत्तरत। (केवल प्रश्नद्वयम्)

**½ × 2 = 1**

(i) निर्धनजनः कथं वित्तम् उपार्जितवान् ?

(ii) तत्तनयः छात्रावासे निवसन् कस्मिन् संलग्नः समभूत् ?

(iii) पिता कं द्रष्टुं प्रस्थितः ?

(ब) पूर्ण वाक्येन उत्तरत। (केवलं प्रश्नमेकम्)

**1 × 1 = 1**

(i) जनः किमर्थं पदातिः प्राचलत् ?

(ii) निशान्धकारे प्रसृते सः किम् अचिन्तयत् ?

(स) प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्) **1 × 3 = 3**

(i) 'धनम्' इत्यस्य किं पर्यायपदं पद्यांशे प्रयुक्तम् ?

(क) वित्तम्

(ख) परमार्थेन

(ग) आश्रयम्

(ii) 'प्रस्थितः' इति पदस्य कर्तृपदं किम् ?

(क) पीडितः

(ख) पिता

(ग) तनूजः

(iii) 'गृही' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम् ?

(क) करुणापर:

(ख) शुभावहा

(ग) गृहस्थम्

(iv) 'गृही' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?

(क) उपागत:

(ख) प्रस्थित:

(ग) प्रायच्छत्

**उत्तर—गद्यांश :**

**(अ) एकपदेन** ½ × 2 = 1

(i) परिश्रम्य

(ii) अध्ययने

(iii) पुत्रम्

**(ब) पूर्णवाक्येन—** 1 × 1 = 1

(i) परमर्थकार्श्येन पीडित: जन: बसयानं विहाय पदातिरेव प्राचलत्।

(ii) "निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा" इति स: अचिन्तयत्।

**(स) निर्देशानुसारं/भाषिक कार्यम्** 1 × 3 = 3

(i) (क) वित्तम्

(ii) (क) पिता

(iii) (क) करुणापर:

(iv) (ग) प्रायच्छत्

**13. अधोलिखितं पद्यं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

निमित्तमुद्दिश्य हि य: प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति॥

**(अ) एकपदेन उत्तरत। (केवल प्रश्नद्वयम्)** ½ × 2 = 1

एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)

(i) अत्र किम् अकारणं द्वेषि उक्तम् ?

(ii) किम् उद्दिश्य य: प्रकुप्यति ?

(iii) कस्य अपगमे मनुष्य: प्रसीदति ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)** 1 × 1 = 1

पूर्ण वाक्य में उत्तर दीजिए। (केवल एक प्रश्न)

(i) मनुष्य: कदा ध्रुवं प्रसीदति ?

(ii) कं जन: कथमपि न परितोषयिष्यति ?

**(स) प्रदत्तविकल्पैभ्य: उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** 1 × 3 = 3

(i) 'य:' इति कर्तृपदस्य क्रियापदं किम् ?

(क) प्रकुप्यति

(ख) प्रसीदति

(ग) मन:

(ii) 'अकारणद्वेषिमन:' अनयो: पदयो: किं विशेष्यपदम् ?

(क) अकारणद्वेषि

(ख) मन:

(ग) ध्रुवम्

(iii) 'मनुष्य' इत्यस्य पदस्य क: पर्याय: श्लोके प्रयुंक्त: ?

(क) कथम्

(ख) जन:

(ग) तम्

(iv) 'अध्रुवम्' इत्यस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

(क) ध्रुवम्

(ख) निमित्तम्

(ग) अपगमे

**उत्तर—पद्यांश:**

**(अ) एकपदेन** ½ × 2 = 1

(i) मन:

(ii) निमित्तम्

(iii) निमित्तस्य

**(अ) पूर्णवाक्येन** 1 × 1 = 1

(i) मनुष्य: निमित्तस्य अपगमे ध्रुवं प्रसीदति।

(ii) यस्य मन: अकारणद्वेषि तं जनं कथमपि न परितोषयिष्यति।

**(ब) निर्देशानुसारम्/भाषिककार्यम्** **1 × 3 = 3**

(i) (क) प्रकुप्यति

(ii) (ख) मन:

(iii) (ख) जन:

(iv) (क) ध्रुवम्

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

लव: — भ्रातरावावां सोदर्यौ।

राम: — समरूप: शरीरसन्निवेश:। वयसस्तु न किञ्चिदन्तरम्।

लव: — आवां यमलौ।

राम: — सम्प्रति युज्यते। किं नामधेयम् ?

लव: — आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि (कुशं निर्दिश्य) आर्योऽपि गुरुचरणवन्दनायाम् ................।

कुश: — अहमपि कुश इत्यात्मानं श्रावयामि।

राम: — अहो ! उदात्तरम्य: समुदाचार:। किं नामधेयो भवतोर्गुरु:।

लव: — ननु भगवान् वाल्मीकि:।

**(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** **½ × 2 = 1**

**एक शब्द में उत्तर दीजिए। (केवल दो प्रश्न)**

(i) लवं क: पृच्छति यत् किं नामधेयम् ?

(ii) लवकुशयो: गुरु: क: ?

(iii) उदात्तरम्य: क: ?

**(ब) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नमेकम्)** **1 × 1 = 1**

**पूर्ण वाक्य में उत्तर दीजिए। (केवल एक प्रश्न)**

(i) कुश: किं कथयति ?

(ii) भ्रातरावावां सोदर्यौ इति श्रुत्वा राम: किं कथयति ?

**(स) प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत। (केवलं प्रश्नत्रयम्)** **1 × 3 = 3**

**(i)** नाट्यांशे 'श्रावयामि' इति क्रियाया: कर्तृपदं किम् अस्ति ?

(क) लव:

(ख) अहम्

(ग) राम:

**(ii)** 'उदात्तरम्य: समुदाचार:' इत्यत्र विशेष्यपदं किम् ?

(क) उदात्तरम्य:

(ख) रम्य:

(ग) समुदाचार:

**(iii)** नाट्यांशे 'विषमरूप:' इत्यस्य किं विलोमपदं प्रयुक्तम्' ?

(क) पटरूप:

(ख) समरूप:

(ग) विरूप:

**(iv)** 'सहोदरौ' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

(क) सोदर्यौ

(ख) आवाम्

(ग) यमलौ

**उत्तर— नाट्यांश :**

**(अ) एकपदेन** **½ × 2 = 1**

(i) राम:

(ii) वाल्मीकि:

(iii) समुदाचार:।

**(ब) पूर्णवाक्येन** **1 × 1 = 1**

(i) अहमपि कुश इत्यात्मानं श्रावयामि।

(ii) राम: श्रुत्वा कथयति-समरूप: शरीर सन्निवेश:, वयसस्तु न किञ्चिदन्तरम्।

**(स) निर्देशानुसारम्/भाषिक कार्यम्** **1 × 3 = 3**

(i) (ख) अहम्

(ii) (ग) समुदाचार:

(iii) (ख) समरूप:

(iv) (ग) यमलौ अथवा (क) सोदर्यौ

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवल प्रश्नचतुष्टयम्)।** **1 × 4 = 4**

(क) तत्र राजसिंहो नाम राजपुत्र: वसति स्म।

(ख) आत्महितैषिभि: सर्वदा व्यायाम: कर्तव्य:।

(ग) धेनुनाम् माता सुरभिः आसीत्।

(घ) आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

(ङ) संसारे विद्वांसः ज्ञानचक्षुभिः नेत्रवन्तः कथ्यते।

**उत्तर—प्रश्ननिर्माणम्** **1 × 4 = 4**

(क) कः

(ख) कीदृशैः

(ग) कासाम्

(घ) का

(ङ) के

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकयोः अन्वयं पूरयत।** **½ × 4 = 2**

**I. उदीरितोऽर्थः पशुनापि गृह्यते,**

**ध्याश्च नागाश्च वहन्ति बोधिताः।**

**अनुक्तमप्यूहति पण्डितो जनः,**

**परेङ्गितज्ञानफला हि बुद्धयः।।**

**अन्वय—**(i) ................ अपि उदीरितः अर्थः ......... गृह्यते बोधिताः हयाः च (ii) ................ च (भारम्) वहन्ति। (iii) ................ जनः अनुक्तम् अर्थ ऊहति। (iv) ................ परेङ्गितज्ञानफला हि (भवन्ति)।

**II. क्रोधो हि शत्रुः प्रथमो नराणां,**

**देहस्थितो देह विनाशनाय।**

**यथास्थितः काष्ठगतो हि वह्निः**

**स एव वह्निर्दहते शरीरम्॥**

**अन्वय—**क्रोधः हि (i) ............. देह विनाशाय। देहस्थितिः (ii) ................ शत्रुः (अस्ति)। यथा (iii) ................ स्थितः हि वह्निः (भवति) सः वह्निः काष्ठम् एव दक्षे तथा (iv) ............... शरीरं दहते।

**मञ्जूषा**

| |
|---|
| प्रथमः, नागाः, बुद्धयः, क्रोधः, पशुना, पण्डितः, नराणाम्, काष्ठगतः |

**अथवा**

**मञ्जूषाः साहाय्येन श्लोकस्य भावार्थं रिक्त स्थाने पूरयित्वा पुनः लिखित।** **1 × 4 = 4**

वाक्पटुधैर्यवान् मन्त्री सभायामप्यकातरः।

स केनापि प्रकारेण परैर्न परिभूयते॥

**भावार्थ :—**

यः मन्त्री (i) ................ सम्भाषणे चतुरः, धैर्ययुक्तः, (ii) ................ च भवति, सः मन्त्री (iii) ................ कथमपि (iv) ................ न शक्यते।

**मञ्जूषा**

| |
|---|
| तिरस्कर्तुम्, निर्भीकः, सभायाम्, विरोधिभिः |

**उत्तर—अन्वयः** **½ × 4 = 2**

I. (i) पशुना

(ii) नागाः

(iii) पण्डितः

(iv) बुद्धयः

II. (i) प्रथमः

(ii) क्रोधः

(Iii) काष्ठगतः

(iv) नराणां।

**अथवा**

**भावार्थ** : 1. सभायाम्, 2. निर्भीकः, 3. विरोधिभिः, 4. तिरस्कर्तुम्।

**17.** अधोलिखित-कथांशं समुचित-क्रमेण लिखत।

निम्नलिखित कथांश को समुचित क्रम में लिखिए। **½ × 8 = 4**

(1) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।

(2) चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति।

(3) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।

(4) तस्यामेव रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(5) विचित्रा दैवगतिः।

(6) तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(7) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

(8) तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**उत्तर—घटनाक्रम**

(i) विचित्रा दैवगतिः।

(ii) तस्यामेव रात्रौ कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(iii) तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।

(iv) चौरस्य पादध्वनिता प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत।

(v) चौरः एव उच्चैः क्रोशितुभारभत "चौरोऽयं चौरोऽयं" इति।

(vi) तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(vii) यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्।

(viii) तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति, तानि यथा क्रमेण समक्षं लिखत। (केवलं प्रश्नत्रयम्)**

'क' स्तम्भ में लिखित पदों के पर्याय पद 'ख' स्तम्भ में लिखे गये हैं। उनको यथा क्रम से उनके समक्ष लिखिए।

**(केवल तीन प्रश्न)**

**1 × 3 = 3**

| (क) | (ख) |
|---|---|
| वह्निः | वेगेन |
| वृक्षः | कुञ्जरः |
| गजः | तरुः |
| जवेन | अग्निः |

**अथवा**

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थान् चित्वा लिखत। (केवल प्रश्नत्रयम्) 1 × 3 = 3**

**(i)** कश्चिद् धूर्तः <u>शृगालः</u> हसन्नाह।

(क) विडालः

(ख) व्याघ्रः

(ग) जम्बुकः

**(ii)** पिता <u>तनुजस्य</u> रुग्णतामाकर्ण्य व्याकुलो जातः।

(क) शरीरस्य

(ख) पुत्रस्य

(ग) गात्रस्य

**(iii)** अभियुक्तः अतीव <u>कृशकायः</u>।

(क) दुर्बलः

(ख) सबलः

(ग) भीमकायः

**(iv)** तस्य गृहं राजमार्गं <u>निकषा</u> वर्तते।

(क) निकटम्

(ख) दूरम्

(ग) स्पर्शम्

**उत्तर—पर्यायपदम्** **1 × 3 = 3**

| क | ख |
|---|---|
| वह्निः | अग्निः |
| वृक्षः | तरुः |
| गजः | कुञ्जरः |
| जवेन | वेगेन |

**1 × 3 = 3**

**अथवा**

(i) (ग) जम्बुकः

(ii) (ख) पुत्रस्य

(iii) (क) दुर्बलः

(iv) (क) निकटम्

❑❑

